तत्पर्य्यायः। सांशयिकः २। इत्यमरः॥ द्वे संशयविषये स्याद्वादी। संशयमापन्नः सांशयिकः स्यात्। संशयमापन्नं मानसं यत्र स्याद्वादी स तथा। संशयमापन्नं मानसं यस्य स तथेति षष्ठ्यन्यपदार्थत्वे संशयितरि पुरुषादावप्येतच्छब्दद्वयप्रवृत्तिः स्यात्। इति भरतः॥

संशयालुः, त्रि, संशयिता। इति हेमचन्द्रः॥

संशयिता, [ ऋ ] त्रि, [ सं+शी+तृच्। ) संशयकर्त्ता। इति हेमचन्द्रः॥

संशरणं, क्ली, (सं+शॄ+ल्युट्।) रणारम्भः। इति शब्दमाला॥ (संरक्षणम्। यथा, कामन्दकीये। ६। ४।
"लोकानुग्रहमन्विच्छन् शरीरमनुपालयेत्।
राज्ञः संशरणं धाम शरीरं धर्म्मसाधनम्॥")

संशितं, त्रि, (सं+शो+क्तः।) सम्यक्सम्पादितम्। व्रतविषयकयत्नवान्। यथा संशितं व्रतम्। सम्यक् सम्पादितमित्यर्थः। संशितो ब्राह्मणः। व्रतविषयकयत्नवानित्यर्थः। इति सिद्धान्तकौमुदी॥

संशुद्धिः, स्त्री, ( सं+शुध+क्तिन्। ) सम्यक् शोधनम्। शरीरमार्ज्जनम्। यथा,—
"सम्मार्ज्जनञ्च संशुद्धिः संशोधनविशोधने॥"
इति रत्नमाला॥

संशुष्कं त्रि, आतपादिना संशोषितवस्तु। संपूर्व्वशुषधातोः क्तप्रत्ययेन निष्पन्नम्॥

संशोधनं, क्ली, (सं+शुध+ल्युट्।) संशुद्धिः। इति रत्नमाला॥

संशोधितं, त्रि (सं+शुध+क्तः।) शुद्धीकृतवस्तु। यथा,—
"ये लेपाः कुष्ठानां युज्यन्ते निर्गतास्रदोषाणाम्
संशोधिताशयानां सद्यः सिद्धिर्भवेत्तेषाम्॥"
इति मधुमती॥

संश्चत्, क्ली, (संचिनोति मायामिति। सं+चि+"सश्चत्तृपद्वेहत्।" उणा० २। ८५। इति अतिप्रत्ययेन निपातनात् साधु।) कुहकः। इत्युणादिकोषः॥

संश्यानः, त्रि, (सं+श्यै+क्तः।) शीतेन सङ्कुचितः। इति मुग्धबोधव्याकरणम्॥

संश्रयः, पुं, (सं+श्रि+अच्।) आश्रयः। यथा,
स्तुता सुरैः पूर्व्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्ये ५ अध्यायः॥
(आश्रयस्थानम्। यथा, रामायणे।२।४१।६।
"अहो नियतनो राजा जीवलोकस्य संश्रयम्।
धर्म्मो सत्यव्रतं रामं वनवासे प्रवत्स्यति॥")

संश्रवः, पुं, ( सं+श्रु+अप्।) अङ्गीकारः। इत्यमरः॥ ( सम्यक् श्रवणम्। यथा, महाभारते। १५। ३। ६।
"अथ भीमः सुहृन्मध्ये बाहुशब्दं तदाकरोत्।
संश्रवे धृतराष्ट्रस्य गान्धार्य्याश्चाप्यमर्षणः॥")

संश्रितः, त्रि, (सं+श्रि+क्तः।) आश्रितः। यथा,
"न प्राचीमग्रतः शम्भोर्नोदीचीं शक्तिसंश्रिताम्।
न प्रतीचीं यतः पृष्ठमतो दक्षं समाश्रयेत्॥"
इति तिथ्यादितत्त्वम्॥

संश्रुतः, त्रि, ( सं+श्रु+क्तः। ) अङ्गीकृतः। इत्यमरः॥ (यथा, रामायणे। ३। १०। २६।
"मया चैतद्वचः श्रुत्वा कार्त्स्न्येन परिपालनम्।
ऋषीणां दण्डकारण्ये संश्रुतं जनकात्मजे॥")

संश्लिष्टः, त्रि, आश्लिष्टः। मिलितः। संपूर्व्वश्लिषधातोः क्तप्रत्ययेन निष्पन्नः॥

संश्लेषः, पुं, (सं+श्लिष+घञ्।) आलिङ्गनम्। इत्यमरः॥ (यथा, महाभारते। १२। १३३। १७।
"संश्लेषञ्च परस्त्रीभिर्दस्युरेतानि वर्ज्जयेत्॥")
मिलनम्॥ (यथा मार्कण्डेये। ३७। १५।
"अनन्तरैश्च संश्लेषमभ्येत्य तदनन्तरम्।
तेषामन्यतमैर्भृत्यैः समाकृष्यानयद्दशम्॥")

संश्वत्, क्ली, (सं+श्वि+अतिप्रत्ययेन निपातनात् सिद्धम्। "संपूर्व्वात् श्वयतेः संश्वदिति सुभूतिचन्द्रः।" इत्युणादिटीकायां उज्ज्वलदत्तः। २। ८५।) माया यथा,—
"संश्वत्तु कुहकं ज्ञेयं संश्वत् तत्रैव ते मते।"
इत्युणादिकोषः॥

संसक्तः, त्रि, ( सं+सञ्ज+क्तः। ) संलग्नः। अव्यवहितः। इत्यमरः॥

संसक्तिः, स्त्री, संसक्तता। संपूर्व्वषञ्जधातोर्भावे क्तिन्प्रत्ययेन निष्पन्ना॥

संसत्, } स्त्री, (संसीदन्त्यस्यामिति। सं+
संसद् } सद्+क्विप्।) सभा। इत्यमरः॥ (यथा, रघुः। १६। २४।
"तदद्भुतं संसदि रात्रिवृत्तं
प्रातर्द्विजेभ्यो नृपतिः शशंस॥")

संसरणं, क्ली, (सं+सृ गतौ+ल्युट्।) प्राणिजन्म। असंबाधसैन्यगमनम्। घण्टापथः। इत्यमरः॥ रणारम्भः। मेदिनी॥ गमनम्। इति शब्दरत्नावली॥ ( संसारः। यथा, भागवते। १०। ४०। २८।
"पुंसो भवेद्यर्हि संसरणापवर्ग-
स्त्वय्यब्जनाभ सदुपासनया मतिः स्यात्॥")

संसर्गः, पुं, ( सं+सृज्+घञ्।) सम्बन्धः। स च समवायादिः। इति न्यायशास्त्रम्॥ *॥ पापिष्ठान्त्यजादिसंसर्गप्रायश्चित्तम्। यथा,—
"स्तेयादिना पतिता इत्युपक्रम्य उक्तम्। अज्ञानतो वत्सरेण पातित्यम्।
"संवत्सरेण पतति पतितेन सहाचरन्।
याजनाध्यापनाद्यौनादेकशय्यासनाशनात्॥"
इति हारीतवचनात्।
ज्ञानतो वत्सरार्द्धेनेति। तदसंसृष्टस्तद्दोषाभाव एव। [ क्वचित्।"
"बान्धवोऽपि पृथग्भूत्वा तत् पापं नाप्नुयात्
इति देवलवचनात्॥ *॥
"यस्तस्य भुङ्क्ते पक्वान्नं कृच्छ्रार्द्धं तस्य निर्दिशेत्।
शुष्कान्नभोजिनः पादमित्याह भगवान् मनुः॥
तस्याविज्ञातचण्डालसहितैकवेश्मस्थसङ्करीकरणकन्दमूलपाककर्त्तुः द्वितीयसंसर्गिणः। तथा चापस्तम्बः।
"अन्त्यजातिरविज्ञातो निवसेद्यस्य वेश्मनि।
स वै ज्ञात्वा तु कालेन कुर्य्यात्तस्य विशोधनम्॥
चान्द्रायणं पराको वा द्विजातीनां विशोधनम्।
प्राजापत्यस्तु शूद्राणां तथा संसर्गदूषणे॥
यैस्तत्र भुक्तं पक्वान्नं कृच्छ्रं तेषां विनिर्द्दिशेत्।
तेषामपि च यैर्भुक्तं तेषामर्द्धं विधीयते।
तेषामपि च यैर्भुक्तं कृच्छ्रपादो विधीयते॥"
अत्र तृतीयसंसर्गिण एव प्रायश्चित्तदर्शनात् चतुर्थसंसर्गे दोषो नास्ति। प्रायश्चित्तविवेकोऽप्येवम्।" इति प्रायश्चित्ततत्त्वम्॥ *॥ अथ संसर्गनिरूपणम्। तत्र महापातकिसंसर्गस्य पापहेतुत्वमाह मनुः।
"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥"
प्रायश्चित्तमपि दर्शितम्।
"एषां पापकृतामुक्ता चतुर्णामपि निष्कृतिः।
पतितैः संप्रयुक्तानामिमाः शृणुत निष्कृतीः॥
यो येन पतितेनैषां संसर्गं याति मानवः।
स तस्यैव व्रतं कुर्य्यात् तत्संसर्गविशुद्धये॥
प्रायश्चित्तीयतां प्राप्य दैवात् पापकृतेन वा।
न संसर्गं व्रजेत् सद्भिः प्रायश्चित्तेऽकृते द्विजः॥"
पापिष्ठसंसर्गी पातकी भवति इति कल्पश्रुतिः॥
विष्णुः। यश्च येन पापात्मना सह संसृजेत् स तस्यैव प्रायश्चित्तं कुर्य्यात्। गौतमोऽप्याह। ब्रह्महसुरापगुरुतल्पगपितृमातृयोनिसम्बन्धागस्तेनाभक्ष्यभक्ष्यनास्तिकनिन्दकनिन्दितकर्म्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः पातकसंप्रयोकाश्च तैश्चाब्दं समाचरन्। निषिद्धपतितसंसर्गात् पततीति श्रुतिः कल्पश्च॥ के ते संसर्गप्रकारा इत्यत्राह बृहस्पतिः।
"एकशय्यासनं पङ्क्तिर्भाण्डपक्वान्नमिश्रणम्।
याजनाध्यापनं योनिस्तथा च सहभोजनम्।
नवधा सङ्करः प्रोक्तो न कर्त्तव्योऽधमैः सह॥"
छागलेयः।
"आलापात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात्।
सहशय्यासनाध्यायात् पापं संक्रमते नृणाम्॥"
यमः।
"दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति।
यो यस्यान्नमिहाश्नाति स तस्याश्नाति किल्बिषम्॥"
देवलः।
"पतितेन सहोषित्वा जानन् संवत्सरं नरः।
मिश्रितस्तेन सोऽब्दान्ते स्वयञ्च पतितो भवेत्॥
याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम्।
कृत्वा सद्यः पतन्त्येते पतितेन न संशयः॥"
व्यासः।
"ब्रह्महा मद्यपः स्तेनो गुरुतल्पग एव च।